

International Journal of Applied Research

ISSN Print: 2394-7500
ISSN Online: 2394-5869
Impact Factor: 5.2
IJAR 2019; 5(3): 295-297
www.allresearchjournal.com
Received: 14-01-2019
Accepted: 16-02-2019

डॉ. अशोक कुमार
ग्राम + पत्रालय—फेंट, प्रखण्ड—बासोपट्टी, जिला—मधुबनी, बिहार, भारत

Correspondence
डॉ. अशोक कुमार
ग्राम + पत्रालय—फेंट, प्रखण्ड—बासोपट्टी, जिला—मधुबनी, बिहार, भारत

# संस्कृतसाहित्ये उपनयनसंस्कारः विद्याध्ययनञ्च

डॉ. अशोक कुमार

**सारांशः —**
उपनयनसंस्कारः समस्तसंस्कारेषु अतिमहत्त्वपूर्णोऽभिमन्यते। संस्कारोऽयं मुख्यः शैक्षिक संस्कारो वर्तते। अनेन संस्कारेण जातकस्य सामाजिके जीवने पदार्पणं भवति। अतो जीवनेऽस्मिन् तस्य अभिनन्दनम् अनुशासनं चापि आवश्यकम्।

**कूट शब्दः** शैक्षिक, सामाजिके जीवने, संस्कृतसाहित्ये

## प्रस्तावना

सामाजिक जीवनं बहुविधानि दायित्वानि अपेक्षते। तद्यथा—

1. नागरिक कर्त्तव्याणां क्रियात्मकं निर्वहणम्।
2. सामुदायिक जीवनस्य संरक्षणम्।
3. संस्कृतेः संरक्षणम्।
4. सभ्यतायाः संरक्षणम्।

काश्चन योग्यः कुशलश्चैव इमानि दायित्वानि सम्यक् निर्वोढ़मर्हति। अतो व्यक्तौ अभीष्टाया योग्यतायाम् उत्पादनं सुतराम् अपेक्ष्यते। अनया दृशाऽस्य संस्कारस्य उद्भवः समुदयगतानां नागरिकीणाम् आवश्यकतानां पूर्तिमवधार्यैव अभवत्। पुरातनस्य भारतीयेतिहासस्य अनुशीलनेन ज्ञायते मत् व्यक्तेः प्राथमिकस्य जीवनस्य निखिला अपि क्रिया धार्मिकीभिः भावनाभिः अनुप्राणिता आसन्। अतो धार्मिकीम् अभिस्वीकृतिं विना किमपि सामुदायिकं कार्यजातं कथमपि नाभिमन्यते स्म। इत्थं कालान्तरे अस्मिन् कर्मणि धर्मस्य समावेशोऽभवत्। सुविदितमेव यत् सामाजिकं जीवनं सुष्टु यापयितुं धर्मानुस्यूतानां विधिनिषेधानां पालनम् अनिवार्यं भवति। लोके सांस्कृतिकी सामाजिकी च द्विविधा दीक्षा प्रसिद्धा वर्तते एव। व्यक्तौ सामाजिकताया अभ्युदयाय शिक्षाया महत्त्वपूर्णस्थानम् अवदानं च वर्तते। सांस्कृतिकवाचां सामाजिकतायां च मिथो घनिष्ठः सम्बन्धो वर्तते। पुरा यो हि मानवः सांस्कृतिकदृष्ट्या सक्षम आसीत् स एव सामाजिक इत्यभिमन्यते स्म। उभयथा विकासमापन्न एव समाजे समग्रान् अधिकारान् विशिष्टाः सुविधाश्च आदातुम् अधिकृत आसीत्। उपनयनसंस्कारस्य माध्यमेन सांस्कृतिकदृष्ट्या सामाजिकदृष्ट्या च दीक्षितस्य मनुजस्य नूतनं जन्म जायते। अत उपनीतो द्विज इत्यभिधीयते।

मातुर्यदग्र जायन्ते द्वितीयं मौञ्जिबन्धनात्।
ब्राह्मण क्षत्रिम विशास्तस्मादेते द्विजाः स्मृताः।।[1]

उपनयनस्य कल्पना तदीयं महत्त्वं च तत्कालीने समाजे अभिमन्यमानं शिक्षाया महत्त्वं प्रकटयति। अवधारणेयं कियती गौरवभाग यत् शिक्षया व्यक्तेः अभिनवं जन्म स्वीक्रियते। उपनयनस्य इदमेव सर्वाधिकं महत्त्वं यदुपनीत एव द्विजत्वेन गण्यते। इदं कृत्य सामाजिके जीवने प्रधानाङ्गभूतं वर्तते। यतोहि अनुपनीत आर्यकन्यां विवोढुम् अनार्हो भवति।

संस्काराणां मूलं परिशीलयामश्चेत् तेषां केन्द्रे मानवस्य मूलभूतेयं धारणा लक्ष्यते यत् स सांसारिक सम्पर्कत्वात् आत्मीयं सहजातं पावित्र्यं पुण्यं च मुञ्चति। तत् पुनरवाप्तुं तस्य द्विजन्मता अपेक्ष्यते। अनुशीलनेन उपनयनं वैदिकं कर्म प्रसिद्धयति।

ऋग्वेदे विद्याध्ययनमुद्दिश्य 'ब्रह्मचर्य' शब्दो द्विः प्रयुक्तो वर्तते–

ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येमङ्गम्।।[2]

तत्रैव सद्य उपनीतस्य अध्येतुरूल्लेखोऽपि समुपलभ्यते –

युवा युवासाः परिवीत आगात् स उश्रेयान्भवति जगमान्<br>तं धीरासः कवय उन्नयति स्वाध्यो मनसादेवयन्तः।।[3]

वैदिकयुगे छात्रो ब्रह्मचारी शिक्षकाश्च आचार्य इत्यभिधीयत। अथर्ववेदे उक्तम् यदाचार्य उपनयनक्रियायाः कार्तृत्वेन ब्रह्मचारिणनूतनं जन्म सृजति। अत एव ब्रह्मचारिण उपनयनं तस्य द्वितीयं जन्म मन्यते–

आचार्य उपनयमानो ब्रह्मचारिण कृणुते गर्भमन्तः।<br>तं राजीस्तिस्त्र उदरे विभर्ति तं जातं द्रष्टुम किसंयन्ति देवाः।।[4]

असिमन्नेव सूक्ते मेखन्वाधारणम्, कृष्णमृगचर्मपरिधानम् अभिषेकः, भिक्षाटनमित्येतेषां स्पष्टमुल्लेखा वर्तते। तैत्तिरीयसंहितायाम् ऋणत्रयस्य वर्णनक्रमे 'ब्रह्मचारी' पुनश्च 'ब्रह्मचर्यम्' इत्युभयोः पदयोः उल्लेखो वर्तते–

''जयमानो ह वै ब्राह्मणस्त्रिभित्रस्णवाँ जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यन्वा ब्रह्मचारिवासी।''

अथर्ववेदस्य सम्पूर्णमेकं सूक्तं ब्रह्मचारिणो ब्रह्मचर्यस्य च प्रशंसा परं वर्तते। तेन ज्ञायते यत् जीवने ब्रह्मचर्यं महत्त्वपूर्णं स्थानमभजत।

ब्रह्मचारीष्णंश्चरति रोदसी उक्ते तस्मिन्देवाः समनसो भवति।<br>स दाधार पृथिवी दिवञ्च स आचार्यं तपसा पिपर्ति।।[5]<br>ब्राह्मणकाले उपनयनं संविधि संस्कारत्वेन प्रतिष्ठाम वाप।

ब्रह्मचारी स्वत आचार्यमुपगम्य प्रार्थयत् यत् स तस्य छात्रत्वमिच्छति। उपनिषत्काले ब्रह्मचर्यम् उत छात्रजीवनं सुप्रतिष्ठितं सांस्थानिकस्वरूपं प्राप्नोत् आचार्यं विना ब्रह्मविद्यायाः प्राप्तिर्न सम्भवा। ऋते ज्ञानान्न मुक्तिः, पुनश्च् ऋते आचार्यान्न ब्रह्मविद्येति निश्चप्रचम्। छान्दोग्योपनिषदि प्रतिपादितम्–''आचार्यस्तु गतिर्वक्ता'' अस्यामेव उपनिषदि ''उप त्वा अयानि'' इत्यनेन स्फुटं परिभाषितं यत् उपनयनं नाम आचार्यस्य समीपे उपगमनं ब्रह्मचर्यप्रवेशश्च। प्रवेशोऽयं न सुगमः प्रत्युत काश्चन मानदण्डान् आदधात्। तैत्तिरीयोपनिषदि प्रवेशपात्रता स्फुटम् उपवर्णिता–''एतद् गुह्यतमं नापुत्राय नाशिष्याय कीर्तवेदनन्यभक्ताम् सर्वगुण सम्पन्नाय दद्यत्।''

अन्तेवासी–यो ब्रह्मचर्यस्य गृहीता दीर्घकालीनं यज्ञावधि गृह्णाति–''दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैति।'' गोपथब्राह्मणानुसारं सर्वेषु वेदेषु सम्पूर्णमधिकारं प्राप्तुं 48 वर्षाधिकं छात्रजीवनम् अपेक्ष्यते। इत्थं प्रतिवेदं द्वादशवर्षाणाम् अध्ययनवधिः स्थिरीभवति। ब्रह्मचारी आचार्यस्य कुले एव न्यवसत्। अतएव स आचार्यकुलवासी उत अन्तेवासी इत्याभिधीयते। स्वाध्यायमतिरिच्य गुरुसेवा, गोचारणम्, यज्ञीयाग्रेः अविरवं प्रदीपनम् इत्यादीनां नैकेषां कर्मणां सम्पादनं तस्य दायित्वमासीत्। इत्थं युगेऽस्मिन् आचार्यस्य स्थानमतीववन्दीयं समादरणीयं चासीत्। श्वेताश्वतरोपनिषद् ब्रह्मविद्याख्यां पराविद्यामवाप्तुं गुरुभक्तिमनिवार्यां मनुते।

गृह्यसूत्राणां काले उपनयनं द्विजत्वमावहति इत्यत्र सर्वाण्यपि गृह्यसूत्राणि ऐकमत्यं भजन्ते। लोपरत्र अक्षम्मो वर्तते। अस्मिन् युगे संस्कारदृष्ट्या अपेक्षितानां विधिविधानानां पर्याप्तो विकासोऽजायत। आयुषः संस्कारस्य अधिकारिणः ब्रह्मचारिण आचारस्य कर्तव्यतायाश्च समग्रं प्रतिपादनं समुपलभ्यते।

उपर्युक्तेन विवेचवेन ज्ञायते यत् आरम्भकाले उपनयनम् अपेक्षाकृतं सरलमासीत्। विद्यार्थी बटुः समित्पागिः गुरूमुपगम्यं स्वीयामभिलाषां तस्य समक्षं विनिवेद्य ब्रह्मचारित्वेन तस्य कुलस्य अन्तेवासित्वं प्रार्थयेत्। ग्रह्मसूत्रेषु प्रतिपादितानां क्रियासंस्काराणां प्रवृत्तिः पूर्वमपि तद्वदेव आसीदिति न लक्ष्यते।

अतिप्राचीनकाले प्रायः पितैव आत्मीयं पुत्रमपाठयत्। बृहदारण्यकोपनिषदि उक्तम्–''अनुशिष्टो न्यसि पित्रेत्योनिरू डो वाच।''[6] याज्ञावल्क्यस्य व्याख्याकारो विश्वरूपोऽपि इदमेव व्याख्याति–''गुरुग्रहणं तु मुख्यं पितुरूपनेतृत्वमिति। तथा च श्रुतिः। तस्मात्पुत्रमनुशिष्टं लोक्यमाहुरिति। आचार्योपनयनं तु ब्राह्मणस्यानुकल्पः।''[7] तथापि तैत्तिरीयसंहितया ब्राह्मणग्रन्थैश्च ज्ञायते यत् सामान्यतो विद्यार्थी गुरुमुपगत्य तत्रैव प्रत्यवसत्। सुविश्रुतः उद्दालकः आरूणिः पुत्रं श्वेतकेतुं ब्रह्मचारित्वेन वेदाध्ययनार्थं गुरुमुपगन्तुं तमाभिप्रैरयत्–

''श्वेतकेतुआरूणेय आस तहं पितोनाच श्वेत केतो वस ब्रह्मचर्य.......सह द्वादशवर्षं उपेत्य चतु.....।''[8]

यथोक्तं प्राक् यदेकस्य वेदस्य अध्ययनावधिः द्वादशवर्षात्मकम् आसीत्। अतः सामान्यतः छात्रजीवनं द्वादशवर्षात्मकमासीत्। काचित् आजीवनं ब्रह्मधर्मस्य चर्चापि समुपलभ्यते। एवं विधे ब्रह्मचारी नैष्ठिको ब्रह्मचारीत्यभिधीयते।[9]

'उपनयन' शब्दो द्वेधा बोधयितुं शक्यते–भावव्युत्पया कारणव्युत्पत्या वेति।
भावव्युत्पतिः –उप समीपे आचार्यादीनां बटोर्नयनं प्रापणमुपनयनम्।
कारणव्युत्पतिः – समीपे आचार्यादीनां नीयते बटुर्यैन तदुपनयनमिति।
अर्थात् स संस्कारः कृत्यं वा येन बालकः आचार्यसमीपे नीयते।

**निष्कर्षः –**

प्रकृतविषये पारस्करगृह्यसूत्रेऽपि इत्थं प्रतिपादितम्– "अष्टवर्ष ब्राह्मणमुपनयेद् गर्भाष्टमे वा।।[10] अर्थात् अष्टौ वर्षाप्यतीतानि यश्चासौ अष्टवर्षस्तं ब्राह्मणं द्विजोतमम् उपनयेत् उपनयनाख्येन संस्कारेण संस्कुर्यात्। गर्भाष्ट मे वा गर्भः गर्भसहचरितोऽब्दः अष्ट मो येषां तानि गर्भाष्टभानि तेषु अतीतेषु वा उपनयेत् ततश्च जन्मतो नवमेऽष्टमे वा वर्षे उपनयेदित्यर्थः हरिहरभाष्यम्।"[11] एवञ्च उपनयनसंस्कारः विद्याध्ययनस्य सोपानं विद्यते।

**संदर्भाः –**


1. या. स्मृ.–1/39।
2. ऋ.वे.–10/109/5।
3. ऋ.वे.–3/8/4।
4. ऋ. वे.–11/5/3।
5. अ. वेदे–11/3/3/2।
6. वृह. उ. –6/2/1।
7. या. स्मृ.–1/15 विश्वरूपटीका।
8. ब्राह्मणग्रन्थे–1, पृ.21।
9. या. स्मृ.– 1/49।
10. पारस्करगृह्यसूत्रम्–2/2/1।
11. पारस्करगृह्यसूत्रम्– पृ.233।